# सुन्दरकाण्ड अष्टत्रिंशः सर्गः (३८) - ॥ वायसवृत्तान्तकथनम् ॥

ततः स कपि शार्दूल स्तेन वाक्येन हर्षितः ।
सीतामुवाच तच्छ्रुत्वा वाक्यं वाक्य विशारदः ॥ १ ॥

युक्तरूपं त्वया देवि भाषितं शुभ दर्शने ।
सदृशं स्त्री स्वभावस्य साध्वीनां विनयस्य च ॥ २ ॥

स्त्रीत्वं न तु समर्थं हि सागरं व्यति वर्तितुम् ।
मामधिष्ठाय विस्तीर्णं शतयोजन मायतम् ॥ ३ ॥

द्वितीयं कारणं यच्च ब्रवीषि विनयान्विते ।
रामादन्यस्य नार्हामि संस्पर्शमिति जानकि ॥ ४ ॥

एतत्ते देवि सदृशं पत्न्यास् तस्य महात्मनः ।
का ह्यन्या त्वामृते देवि ब्रूयाद् वचन मीदृशम् ॥ ५ ॥

श्रोष्यते चैव काकुत्स्थः सर्वं निरवशेषतः ।
चेष्टितं यत्त्वया देवि भाषितं मम चाग्रतः ॥ ६ ॥

कारणैर् बहुभिर् देवि रामप्रिय चिकीर्षया ।
स्नेह प्रस्कन्न मनसा मयैतत् समुदीरितम् ॥ ७ ॥

लङ्काया दुष्प्रवेशत्वाद् दुस्तरत्वान् महोदधेः ।
सामर्थ्या दात्मनश्चैव मयैतत् समुदीरितम् ॥ ८ ॥

इच्छामि त्वां समानेतु मद्यैव रघुबन्धुना ।
गुरु स्नेहेन भक्त्या च नान्यथै तदुदाहृतम् ॥ ९ ॥

यदि नोत्सहसे यातुं मया सार्ध मनिन्दिते ।
अभिज्ञानं प्रयच्छ त्वं जानीयाद् राघवो हि यत् ॥ १० ॥

एवमुक्ता हनुमता सीता सुर सुतोपमा ।
उवाच वचनं मन्दं बाष्प प्रग्रथिताक्षरम् ॥ ११ ॥

इदं श्रेष्ठ मभिज्ञानं ब्रूयास्त्वं तु मम प्रियम् ।
शैलस्य चित्रकूटस्य पादे पूर्वोत्तरे पुरा ॥ १२ ॥

तापसाश्रमवासिन्याः प्राज्य मूल फलोदके ।
तस्मिन् सिद्धाश्रमे देशे मन्दाकिन्या ह्यदूरतः ॥ १३ ॥

तस्योपवन षण्डेषु नानापुष्प सुगन्धिषु ।
विहृत्य सलिल क्लिन्ना तवाङ्के समुपाविशम् ॥ १४ ॥

ततो मांस समायुक्तो वायसः पर्य तुण्डयत् ।
तमहं लोष्ट मुद्यम्य वारयामि स्म वायसम् ॥ १५ ॥

दारयन्स च मां काकस्तत्रैव परिलीयते ।
न चाप्युपारमन् मांसाद् भक्षार्थी बलिभोजनः ॥ १६ ॥

उत्कर्षन्त्यां च रशनां क्रुद्धायां मयि पक्षिणि ।
स्रस्यमाने च वसने ततो दृष्टा त्वया ह्यहम् ॥ १७ ॥

त्वयाप हसिता चाहं क्रुद्धा संलज्जिता तदा ।
भक्ष गृध्नेन काकेन दारिता त्वा मुपागता ॥ १८ ॥

आसीनस्य च ते श्रान्ता पुनरुत् सङ्ग माविशम् ।
क्रुध्यन्ती च प्रहृष्टेन त्वयाहं परिसान्त्विता ॥ १९ ॥

बाष्प पूर्ण मुखी मन्दं चक्षुषी परिमार्जती ।
लक्षिताहं त्वया नाथ वायसेन प्रकोपिता ॥ २० ॥

परिश्रमात् प्रसुप्ता च राघवाङ्केऽप्यहं चिरम् ।
पर्यायेण प्रसुप्तश्च ममाङ्के भरताग्रजः ॥ २१ ॥

स तत्र पुनरेवाथ वायसः समुपागमत् ।
ततः सुप्त प्रबुद्धां मां रामस्याङ्कात् समुत्थिताम् ॥ २२ ॥

वायसः सहसागम्य विददार स्तनान्तरे ।
पुनः पुनरथोत्पत्य विददार स मां भृशम् ॥ २३ ॥

ततः समुक्षितो रामो मुक्तैः शोणित बिन्दुभिः ॥ २४ ॥
स मां दृष्ट्वा महाबाहुर्वितुन्नां स्तनयोस्तदा ॥ २५ ॥

आशीविष इव क्रुद्धः श्वसन् वाक्य मभाषत ।
केन ते नाग नासोरु विक्षतं वै स्तनान्तरम् ॥ २६ ॥

कः क्रीडति सरोषेण पञ्चवक्त्रेण भोगिना ।
वीक्षमाणस् ततस् तं वै वायसं समुदैक्षत ॥ २७ ॥

नखैः सरुधिरैस् तीक्ष्णैर् मामेवाभि मुखं स्थितम् ।
पुत्रः किल स शक्रस्य वायसः पततां वरः ॥ २८ ॥

धरान्तर गतः शीघ्रं पवनस्य गतौ समः ।
ततस् तस्मिन् महाबाहुः कोप संवर्तितेक्षणः ॥ २९ ॥

वायसे कृतवान्क्रूरां मतिं मतिमतां वरः ।
स दर्भं संस्तराद्गृह्य ब्राह्मे णास्त्रेण योजयत् ॥ ३० ॥

स दीप्त इव कालाग्निर् जज्वालाभि मुखो द्विजम् ।
स तं प्रदीप्तं चिक्षेप दर्भं तं वायसं प्रति ॥ ३१ ॥

ततस्तं वायसं दर्भः सोम्बरेनुजगाम तम् ।
अनुसृप्त स् तदा काको जगाम विविधां गतिम् ॥ ३२ ॥

लोक काम इमं लोकं सर्वं वै विचचार ह ।
स पित्रा च परित्यक्तः सुरैश्च स महर्षिभिः ॥ ३३ ॥

त्रीँल्लोकान्सम्परिक्रम्य तमेव शरणं गतः ।
स तं निपतितं भूमौ शरण्यः शरणागतम् ॥ ३४ ॥

वधार्हमपि काकुत्स्थः कृपया पर्यपालयत् ॥ ३५ ॥
परिद्यूनं विषण्णं च स तमायान्त मब्रवीत् ।
मोघं कर्तुं न शक्यं तु ब्राह्ममस्त्रं तदुच्यताम् ॥ ३६ ॥

ततस् तस्याक्षि काकस्य हिनस्ति स्म स दक्षिणम् ॥ ३७ ॥

दत्त्वा स दक्षिणं नेत्रं प्राणेभ्यः परिरक्षितः ।
स रामाय नमस्कृत्वा राज्ञे दशरथाय च ॥ ३८ ॥

विसृष्टस् तेन वीरेण प्रतिपेदे स्वमालयम् ।
मत्कृते काकमात्रे तु ब्रह्मास्त्रं समुदीरितम् ॥ ३९ ॥

कस्माद्यो मां हरत्त्वत्तः क्षमसे तं महीपते ।
स कुरुष्व महोत्साहः कृपां मयि नरर्षभ ॥ ४० ॥

त्वया नाथवती नाथ ह्यनाथा इव दृश्यते ।
आनृशंस्यं परो धर्मस् त्वत्त एव मया श्रुतः ॥ ४१ ॥

जानामि त्वां महावीर्यं महोत्साहं महाबलम् ।
अपार पार मक्षोभ्यं गाम्भीर्यात् सागरोपमम् ॥ ४२ ॥

भर्तारं ससमुद्राया धरण्या वासवोपमम् ।
एवमस्त्र विदां श्रेष्ठः सत्यवान् बलवानपि ॥ ४३ ॥

किमर्थ मस्त्रं रक्षस्सु न योजयसि राघवः ।
न नागा नापि गन्धर्वा नासुरा न मरुद्गणाः ॥ ४४ ॥

रामस्य समरे वेगं शक्ताः प्रति समाधितुम् ।
तस्य वीर्यवतः कश्चिद् यद्यस्ति मयि सम्भ्रमः ॥ ४५ ॥

किमर्थं न शरैस् तीक्ष्णैः क्षयं नयति राक्षसान् ।
भ्रातु रादेश मादाय लक्ष्मणो वा परन्तपः ॥ ४६ ॥

कस्य हेतोर्न मां वीरः परित्राति महाबलः ।
यदि तौ पुरुष व्याघ्रौ वाय्वग्नि सम तेजसौ ॥ ४७ ॥

सुराणामपि दुर्धर्षौ किमर्थं मामुपेक्षतः ।
ममैव दुष्कृतं किञ्चिन् महदस्ति न संशयः ॥ ४८ ॥

समर्थावपि तौ यन्मां नावेक्षेते परन्तपौ ।
वैदेह्या वचनं श्रुत्वा करुणं साश्रु भाषितम् ॥ ४९ ॥

अथाब्रवीन्महातेजा हनुमान् मारुतात्मजः ।
त्वच्छोक विमुखो रामो देवि सत्येन मे शपे ॥ ५० ॥

रामे दुःखाभिपन्ने च लक्ष्मणः परितप्यते ।
कथंचिद् भवती दृष्टा न कालः परिशोचितुम् ॥ ५१ ॥

इमं मुहूर्तं दुःखानां द्रक्ष्यस्यन्त मनिन्दिते ।
तावुभौ पुरुष व्याघ्रौ राजपुत्रौ महाबलौ ॥ ५२ ॥

त्वद्दर्शन कृतोत् साहौ लङ्कां भस्मी करिष्यतः ।
हत्वा च समरे क्रूरं रावणं सह बान्धवम् ॥ ५३ ॥

राघवस्त्वां विशालाक्षि नेष्यति स्वां पुरीं प्रति ।
ब्रूहि यद्राघवो वाच्यो लक्ष्मणश्च महाबलः ॥ ५४ ॥

सुग्रीवो वापि तेजस्वी हरयोपि समागताः ।
इत्युक्तवति तस्मिंश्च सीता सुर सुतोपमा ॥ ५५ ॥

कौसल्या लोकभर्तारं सुषुवे यं मनस्विनी ॥ ५६ ॥

तं ममार्थे सुखं पृच्छ शिरसा चाभिवादय ।
स्रजश्च सर्वरत्नानि प्रिया याश्च वराङ्गनाः ॥ ५७ ॥

ऐश्वर्यं च विशालायां पृथिव्या मपि दुर्लभम् ।
पितरं मातरं चैव संमान्याभि प्रसाद्य च ॥ ५८ ॥

अनु प्रव्रजितो रामं सुमित्रा येन सुप्रजाः ।
आनुकूल्येन धर्मात्मा त्यक्त्वा सुख मनुत्तमम् ॥ ५९ ॥

अनुगच्छति काकुत्स्थं भ्रातरं पालयन् वने ।
सिंहस्कन्धो महाबाहुर् मनस्वी प्रियदर्शनः ॥ ६० ॥

पितृवद् वर्तते रामे मातृवन् मां समाचरन् ।
ह्रियमाणां तदा वीरो न तु मां वेद लक्ष्मणः ॥ ६१ ॥

वृद्धोपसेवी लक्ष्मीवान् शक्तो न बहु भाषिता ।
राजपुत्रः प्रियः श्रेष्ठः सदृशः श्वशुरस्य मे ॥ ६२ ॥

मम प्रियतरो नित्यं भ्राता रामस्य लक्ष्मणः ।
नियुक्तो धुरि यस्यां तु तामुद्वहति वीर्यवान् ॥ ६३ ॥

यं दृष्ट्वा राघवो नैव वृत्तमार्य मनुस्मरेत् ।
स ममार्थाय कुशलं वक्तव्यो वचनान् मम ॥ ६४ ॥

मृदुर् नित्यं शुचिर् दक्षः प्रियो रामस्य लक्ष्मणः ।
यथा हि वानर श्रेष्ठ दुःख क्षयकरो भवेत् ॥ ६५ ॥

त्वमस्मिन् कार्य निर्योगे प्रमाणं हरि सत्तम ।
राघवस् त्वत् समारम्भान् मयि यत्नपरो भवेत् ॥ ६६ ॥

इदं ब्रूयाश्च मे नाथं शूरं रामं पुनः पुनः ।
जीवितं धारयिष्यामि मासं दशरथात्मज ॥ ६७ ॥

ऊर्ध्वं मासान्न जीवेयं सत्येनाहं ब्रवीमि ते ।
रावणेनोप रुद्धां मां निकृत्या पाप कर्मणा ॥ ६८ ॥

त्रातु मर्हसि वीर त्वं पातालादिव कौशिकीम् ।
ततो वस्त्रगतं मुक्त्वा दिव्यं चूडामणिं शुभम् ॥ ६९ ॥

प्रदेयो राघवायेति सीता हनुमते ददौ ।
प्रतिगृह्य ततो वीरो मणिरत्न मनुत्तमम् ॥ ७० ॥

अङ्गुल्या योजयामास न ह्यस्य प्राभवद् भुजः ।
मणिरत्नं कपिवरः प्रतिगृह् याभिवाद्य च ॥ ७१ ॥

सीतां प्रदक्षिणं कृत्वा प्रणतः पार्श्वतः स्थितः ।
हर्षेण महता युक्तः सीता दर्शनजेन सः ।
हृदयेन गतो रामं शरीरेण तु निष्ठितः ॥ ७२ ॥

मणिवरमुपगृह्य तं महार्हं
जनक नृपात्मजया धृतं प्रभावात् ।

गिरिरिव पवनावधूत मुक्तः
सुखितमनाः प्रति सङ्क्रमं प्रपेदे ॥ ७३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे अष्टत्रिंशः सर्गः ॥ ३८ ॥